श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्र अनुगृहीतं

# ॥ श्री प्रपन्नानन्दस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री प्रपन्नानन्दस्तोत्रम् ॥

श्रीवेङ्कटधरणीधरपतिवक्षस्स्थलविशालकेळिगृहम्।
जगदुज्जीवनसुस्मितललितमुखं तन्ममास्तु वस्तु हृदि ॥ 1 ॥

निबरीसभ्रमरीरुचिकबरीसङ्गतमनोज्ञसुमहारान्।
कलयामहेऽत्युदारान्मुररिपुदारान्कृतार्तिपरिहारान् ॥ 2 ॥

नववज्रकलितदिनकरसितकिरणाभरणरुचिरकचभारान्।
करुणाभरसुस्मेरान्नुचिरविहाराभजे हरेर्दारान् ॥ 3 ॥

कुङ्कुमतिलकितफालं विलुलितसुस्निग्धमुग्धकुन्तलजालम्।
कलये वदान्यशीलं कलशाम्बुनिधेरपत्यमच्युतलोलम् ॥ 4 ॥

निटिलविजितेन्दुबालं भ्रूवल्लिस्फुरणवशितयदुबालम्।
लक्ष्मीवदान्यलीलं वस्तु मदीयेऽस्तु हृदि विनतपालम् ॥ 5 ॥

चंपकसुमसमनासां संपन्निधिमाश्रयेऽम्बुधिं भासाम्।
अमरीणां सर्वासां शरण्यचरणां सरोरुहनिवासाम् ॥ 6 ॥

कुवलयरुचिमदविघटनपटुनयनयुगं तवार्थिकल्पनगम्।
स्वान्ते करोमि मुररिपुकान्ते शान्ते नितान्तमेकान्ते ॥ 7 ॥

कलिताश्रितार्तिभङ्गान् वशितमहापुरुषविभ्रमविभङ्गान्।
सञ्चिन्तयाम्यपाङ्गान्मङ्गळदेव्यास्सदा महोत्तुङ्गान् ॥ 8 ॥

वदनरुचिह्रदविहरन्नयनमहामीनराजनिष्ठयुतम्।
नासाविवरविलग्नं नूनं ध्यायामि मौक्तिकं देव्याः ॥ 9 ॥

मुखविजितचन्द्रबिम्बं मुग्धाधरकान्तिधूतनवबिम्बम्।
पङ्कजनयनकुटुम्बं सङ्कलये सर्वसुरजनालम्बम्॥ 10 ॥

सकलजगदग्रगण्यं सरसिजनयनस्य परिणतम् पुण्यम्।
अस्मादृशां शरण्यं विभावये मनसि किमपि लावण्यम्॥ 11 ॥

जगदीश्वरत्वयोग्यं जगदीश्वरविहरणैकतमभोग्यम्।
तत्किमपि महाभाग्यं मम नृत्यतु मनसि कल्पितारोग्यम्॥ 12 ॥

शुभदायिनामधेयं सकलसुरस्तोमयुवतिजनगेयम्।
गोविन्दभागधेयं गोपायतु मां नतावळिविधेयम्॥ 13 ॥

मलयानिलकेळिसखं सुधासहाध्यायिदिव्यतररचनम्।
वचनं सुधाब्धिपुत्र्या रचयतु सकलां श्रियं ममाविकलाम्॥ 14 ॥

निजदयितवदनविधुरुचिविलोकनायात्तमुकुरयुगळमिव।
विमलं कपोलयुगळं कमलायाश्चिन्तयान्तरङ्ग मम॥ 15 ॥

लक्ष्म्या वदनशशाङ्कं श्रुतियुगसङ्कलितवज्रताटङ्कम्।
ध्यायामि धुतातङ्कं मुक्तामणिभूषितं गताशङ्कम्॥ 16 ॥

धृतदिव्यकनकचेलाः कैरवबन्धुस्तनन्धयनिटालाः।
दिव्याः काश्चन लीला अव्यासुर्विकचपद्मवनलोला॥ 17 ॥

चञ्चलकटाक्षरेखान्कांश्चिदुदञ्चितविभूषणमयूखान्।
किलिकिञ्चितपरिवञ्चितबलिवञ्चकमानसान्भजामि रसान्॥ 18 ॥

कनकसरोरुहकुड्मलदायादस्तनभरान्गभीरतरान्।
कलयामि रूपविभवान्कांश्चन लीलातरङ्गितात्मभवान्॥ 19 ॥

अमृतसखव्याहारानाश्रयविधुकिरणमदहरणहारान्।
विभवान्काञ्चिदपरान्विश्वजगज्जीवनस्तनक्षीरान्॥ 20 ॥

नळिनालङ्कृतहस्तां नळिनाक्षस्य प्रियां सुगुणशस्ताम्।
प्रणमामश्शतशस्तां शरणागतरक्षणेष्वविस्रस्ताम्॥ 21 ॥

मणिमयकङ्कणवलयं कलितसुराधीशखेदभरविलयम्।
काञ्चनकाञ्चिकलापानञ्चितविद्युल्लतासदृशरूपान्॥ 22 ॥

शरणागतभरणानघचरणामरुणाधरां जगज्जननीम्।
करुणाभरवरुणालयपरिणाहिविलोचनां भजे शरणम्॥ 23 ॥

किं बहुभिर्देवैरिह शम्बरडम्बरहरस्य तामम्बाम्।
अम्बुजनयनसखीं विधुबिम्बमुखीं संश्रयानिशम् हृदय॥ 24 ॥

ललितपदं कलितमुदं जननिपदं श्रेयसां पठन्विशदम्।
स्तवमिह तव प्रपन्नानन्दं विन्दत्यमन्दमानन्दम्॥ 25 ॥

स्तुतिमिति महिशूरपुरीचाममहीपालकुलसमृद्धिकृते।
तत्कुलगुरुर्व्यतानीच्छ्रीकृष्णब्रह्मतन्त्रपरकालः॥ 26 ॥

॥ श्री प्रपन्नानन्दस्तोत्रं समाप्तम्॥